# Government General Degree College at Ranibandh

## Rautora, Ranibandh, Bankura - 722135

## Sanskrit Department

## Study Material for Honours

## 1st Year 2nd Semester

## Paper – Poetics And Literary Criticism (C-3)

## Unit 2 – Sahityadarpana 10th Chapter

# साहित्यदर्पणः - दशमपरिच्छेदः

## १) श्लेषः

विश्वनाथकविराजप्रणीतस्य साहित्यदर्पणस्य दशमपरिच्छेदे अलङ्कारवर्णनावसरे अलङ्कारस्य शब्दालङ्कारः अर्थालङ्कारश्चेति भेदद्वयम् उपन्यस्तम्। शब्दालङ्कारेषु अन्यतमस्य श्लेषस्य लक्षणम् उक्तं साहित्यदर्पणे –

**"श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष उच्यते"** इति। अर्थात् श्लिष्टैः युगपद् अनेकार्थबोधकैः पदैः सुबन्तैः तिङन्तैश्च अनेकार्थाभिधाने अनेकेषाम् अर्थानाम् अभिधानं अभिधावृत्त्या उपस्थापनं यत्र तत्र श्लेषनामकः शब्दालङ्कारो भवति इति लक्षणस्य अर्थः।

अयं श्लेषालङ्कारः श्लेषालङ्कारः अष्टविधः भवति। यथा – वर्णगतः, प्रत्ययगतः, लिङ्गगतः, प्रकृतिगतः, पदगतः, विभक्तिगतः, वचनगतः, भाषागतः च इति। तथाहि विश्वनाथः साहित्यदर्पणे –

**"वर्णप्रत्ययलिङ्गानां प्रकृत्योः पदयोरपि॥**

**श्लेषाद्विभक्तिवचनभाषाणामष्टधा च सः। " इति।**

तत्र वर्णगतश्लेषस्योदाहरणं यथा –

**“प्रतिकूलतामुपागते हि विधौ विफलत्वमेति बहुसाधनता।**

**अवलम्बनाय दिनभर्तुरभून्न पतिष्यतः करसहस्रमपि।।” इति।**

अस्मिन् श्लोके सूर्यास्तवर्णनं भवति। विधिशब्दस्य इकारान्तस्य भाग्यपरकस्य विधुशब्दस्य उकारान्तस्य चन्द्रपरकस्य च सप्तम्येकवचने विधौ इति रूपम्। विधौ चन्द्रमसि प्रतिकूलतापन्ने उदयं प्राप्ते बहुसाधनता विफलत्वमेति अनेकरश्मिसम्पन्नस्य सूर्यस्य अस्तगमनं निश्चितम् इति अभिप्रायः चन्द्रपक्षे। भाग्यपक्षे च यस्य पुरुषस्य भाग्यं प्रतिकूलं तस्य बहुसाधना विफला इत्यभिप्रायः। अत्र विधौ इति पदस्य विधुविधिपरकत्वाद् उकारस्य इकारस्य च श्लेषाद् वर्णश्लेषः। एवमेव

**“किरणा हरिणाङ्कस्य दक्षिणश्च समीरणः।**

**कान्तोत्सङ्गजुषां नूनं सर्व एव सुधाकिरः।।”** इत्यादयः श्लोकाः क्रमशः प्रत्ययवचनादीनां श्लेषाणाम् उदाहरणानि भवन्ति।

## २) उपमा

विश्वनाथकविराजप्रणीतस्य साहित्यदर्पणस्य दशमपरिच्छेदे अलङ्कारवर्णनावसरे अलङ्कारस्य शब्दालङ्कारः अर्थालङ्कारश्चेति भेदद्वयम् उपन्यस्तम्। सादृश्यमूलकानाम् अर्थालङ्काराणां जननी भवति उपमा। तस्या लक्षणम् उक्तं साहित्यदर्पणे – **“साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः।”** इति।

वाक्यैक्ये द्वयोः अवैधर्म्यं वाच्यं साम्यम् उपमा अलङ्कारः भवति। वाक्यैक्ये एकस्मिन् वाक्ये सति द्वयोः उपमानोपमेययोः वाच्यम् अभिधावृत्त्या शब्दद्वारा प्रतिपाद्यम् अवैधर्म्यं विरुद्धधर्मरहितं साम्यं सादृश्यम् उपमा उपमानामकः अर्थालङ्कारः भवतीति लक्षणार्थः।

यस्य सादृश्यं तद् उपमेयं भवति। येन सह सादृश्यं तद् उपमानं भवति। रूपकादिषु अलङ्कारेषु यत् उपमानोपमेययोः सादृश्यं तद् व्यङ्ग्यं भवति न शब्दद्वारा प्रतिपाद्यम्। परन्तु उपमालङ्कारे शब्दद्वारा अभिधया प्रतिपाद्यते इति रूपकादितः भिन्ना उपमा। साधारणतया द्वयोः मध्ये साधर्म्यं वैधर्म्यं च तिष्ठति। उपमालङ्कारे वैधर्म्यं नोच्यते इवादिसादृश्यवाचकशब्दैः सादृश्यमेव उच्यते। व्यतिरेके तु वैधर्म्यमेव उच्यते इति व्यतिरेकाद् उपमाया भेदः। उपमेयोपमालङ्कारे द्वयोः सादृश्यमेव प्रतिपाद्यते। किन्तु तत्र वाक्यद्वयम् उपमायाम् एकमेव वाक्यमिति विशेषः। अनन्वयालङ्कारे तु एकस्यैव साम्योक्तिः उपमायाम् उपमानोपमेययोः इति विशेषः। एवम् उपमानोपमेयरूपेण कल्पितयोः द्वयोः पदार्थयोः शब्दप्रतिपाद्यं साम्यम् उपमा।

यथा चन्द्र इव मुखं सुन्दरम् इत्युदाहरणम्। चन्द्रः मुखं च इति सम्पूर्णं भिन्नं वस्तुद्वयम् अस्ति। सौन्दर्यम् चन्द्रे मुखेच वर्तते। सौन्दर्यरूपं साधर्म्यम् आदाय इवेति सादृश्यवाचकेन शब्देन चन्द्रमुखयोः सादृश्यम् उक्तम् इति उपमालङ्कारः।

सा उपमा द्विविधा भवति – क) पूर्णोपमा ख) लुप्तोपमा च।

**क) पूर्णोपमा –** पूर्णोपमायाः लक्षणं साहित्यदर्पणे आह–

**"सा पूर्णा यदि सामान्यधर्म औपम्यवाचि च।**

**उपमेयं चोपमानं भवेत् वाच्यम्॥"** इति।

सामान्यधर्मः, औपम्यवाची शब्दः, उपमेयं उपमानं च यदा शब्दद्वारा अभिधया प्रतिपाद्यते तदा पूर्णा उपमा भवति। यस्मिन् उपमालङ्कारे सामान्यधर्मः साधारणधर्मः, औपम्यवाची सादृश्यबोधकः शब्दः, उपमेयम् उपमानम् च भवेत् चेत् सा पूर्णोपमा इति वक्तव्यम्। अर्थात् पूर्णोपमायाः चत्वारि अङ्गानि सन्ति – १) उपमेयम्, २) उपमानम्, ३) साधारणधर्मः, ४) सादृश्यवाचकशब्दः।

यथा चन्द्र इव मुखं सुन्दरम् इति उदाहरणे उपमेयं मुखम्, उपमानं चन्द्रः, इव इति सादृश्यवाचकशब्दः सुन्दरम् इति साधारणधर्मवाचकं पदं विद्यते इति पूर्णोपमा।

पूर्णोपमा द्विविधा श्रौती आर्थी च। श्रुतिमात्रेण उपमानोपमेयगतसादृश्यबोधकाः यथेववाशब्दाः यत्र प्रयुक्ताः यत्र च "तत्र तस्येव" इति पाणिनीयसूत्रेण इवार्थे वतिप्रत्ययः प्रयुक्तः तत्र श्रौती उपमा। यत्र तुल्यसदृशादयः अर्थानुसन्धादेव सादृश्यबोधकाः शब्दाः प्रयुक्ताः यत्र च "तेन तुल्यं क्रिया चेद्वतिः" इति पाणिनीयसूत्रेण तुल्यार्थे वतिप्रत्ययः प्रयुक्तः तत्र आर्थी उपमा। साहित्यदर्पणे आह–

**"श्रौती यथेववाशब्दा इवार्थो वा वतिर्यदि।**

**आर्थी तुल्यसमानाद्यास्तुल्यार्थो यत्र वा वतिः॥"** इति।

एवमेव श्रौती आर्थी चोपमा तद्धितगता वाक्यगता समासगता चेति त्रिविधा। अर्थात् पूर्णोपमा षड्विधा।

**ख) लुप्तोपमा –** लुप्तोपमायाः लक्षणं साहित्यदर्पणे आह–

**"लुप्ता सामान्यधर्मादेः एकस्य यदि वा द्वयोः।**

**त्रयाणां वानुपादाने श्रौत्यार्थी सापि पूर्ववत्॥"** इति।

लुप्ता अनुल्लिखिता उपमा यत्र सा लुप्तोपमा। अत्र उपमाशब्देन उपमाघटकपदार्थानाम् उपमानोपमेयादीनां ग्रहणं भवति। चतुर्षु उपमाघटकपदार्थेषु एकस्य द्वयोः त्रयाणां वा अनुल्लेखः यत्र सा लुप्तोपमा।

सा लुप्तोपमा द्विविधा भवति। ते च श्रौती, आर्थी इति। पूर्ववत् इत्यस्य अर्थस्तु पूर्णोपमावत् लुप्तोपमा अपि श्रौत्यार्थीभेदेन द्विविधा इति। अत्रोदाहरणं यथा –

**"मुखमिन्दुर्यथा पाणिः पल्लवेन समः प्रिये।**

**वाचः सुधा इवोष्ठस्ते बिम्बतुल्यो मनोऽश्मवत्।।" इति।**

अत्र मुखमिति उपमेयम् इन्दुरिति उपमानं यथेति च सादृश्यवाचकः शब्दो विद्यते। किन्तु साधारणधर्मस्य सुन्दरमित्यस्य अनुल्लेखाद् लुप्तोपमालङ्कारः।

सा लुप्तोपमा पूर्णोपमावत् श्रौती आर्थी चेति द्विविधा। तद्धिते श्रौत्या असम्भवात् श्रौती वाक्यगता समासगता चेति द्विविधा। आर्थी तद्धितगता वाक्यगता समासगता चेति त्रिविधा। एवं लुप्तोपमा पञ्चविधा भवतीति शम्।

## ३) रूपकम्

विश्वनाथकविराजप्रणीतस्य साहित्यदर्पणस्य दशमपरिच्छेदे अलङ्कारवर्णनावसरे अलङ्कारस्य शब्दालङ्कारः अर्थालङ्कारश्चेति भेदद्वयम् उपन्यस्तम्। सादृश्यमूलकेषु अर्थालङ्कारेषु अन्यतमं रूपकम्। तस्य लक्षणमुक्तं साहित्यदर्पणे – **"रूपकं रूपितारोपाद्विषये निरपह्नवे।"** इति।

निरस्तः अपह्नवः गोपनं यस्य तथोक्ते निरपह्नवे निषेधरहिते विषये उपमेये रूपितारोपाद् रूपितस्य उपमानपदार्थतादात्म्यस्य आरोपाद् रूपकनामकः अलङ्कारः भवतीति लक्षणार्थः। उपमेयस्य उपमानात्मना प्रतीतिः भवति। उपमेयस्य उपमानेन साकम् अभेदप्रतीतिः जायते।

उपमेये आरोप्यमाणस्य उपमानाभेदस्य यदा प्रकृतोपयोगित्वं तदा परिणामालङ्कारः। परन्तु उपमेये आरोप्यमाणः उपमानाभेद एव रूपकमिति विशेषः। उपमेयगोपनेन उपमानाभेदः अपह्नुत्यलङ्कारे भवति। रूपकालङ्कारे तु उपमानाभेदः उपमेयस्य अगोपनेन एव भवतीति विशेषः।

मुखचन्द्रः भाति इति उदाहरणं। अत्र उपमेयं मुखं निषेधरहितम्। उपमेयस्य मुखस्य उपमानेन चन्द्रेण साकम् अभेदारोपः क्रियते। एतेन चन्द्राभिन्नं मुखं भाति। अत एव रूपकालङ्कारः इति उच्यते।

रूपकं परम्परितं साङ्गं निरङ्गं चेति त्रिविधं भवति।

**क) परम्परितम् – "यत्र कस्यचिदारोपः परारोपणकारणम्। तत्परम्परितम्"** इति लक्षणम्। यस्मिन् रूपके कस्यचिदारोपः परारोपस्य निमित्तभूतं तत्परम्परितं भवति। तच्च परम्परितं श्लिष्टनिबन्धनम् अश्लिष्टनिबन्धनं चेति द्विविधम्। पुनः तद्द्वयं केवलं मालारूपं चेति द्विविधम्। अनेन प्रकारेण परम्परितरूपकं चतुर्विधम्। तस्य उदाहरणं यथा –

**"आहवे जगदुद्दण्ड राजमण्डलराहवे।**

**श्रीनृसिंहमहीपाल स्वस्त्यस्तु तव बाहवे।।"** इति। अत्र क्रमशः राजमण्डलं बाहुश्च उपमेयद्वयं चन्द्रबिम्बं राहुश्च उपमानद्वयम्। द्वयोः अभेदारोपाद् रूपकालङ्कारः। किञ्च, राजमण्डलं नृपसमूह एव चन्द्रबिम्बम् इत्यारोपः राजबाहुद्वयमेव राहुः इत्यारोपे निमित्तम् इति परम्परितं रूपकम्।

**ख) साङ्गम् – "अङ्गिनो यदि साङ्गस्य रूपणं साङ्गमेव तत्"** इति लक्षणम्। साङ्गस्य आकाङ्क्षिताङ्गसहितस्य अङ्गिनो मुखस्य उपमानस्य यदि रूपणं तथैव साङ्गे उपमेये अभेदारोपः भवति तदा तत् साङ्गं रूपकम्। तच्च समस्तवस्तुविषयम् एकदेशविवर्ति चेति द्विविधम्। तस्य उदाहरणं यथा –

**"रावणावग्रहक्लान्तमिति वागमृतेन सः।**

**अभिवृष्य मरुत्संस्थं कृष्णमेघस्तिरोदधे।।"** इति। अत्र कृष्ण एव मेघः इति वाग् एव अमृतम् इति च अभेदारोपो वर्तते। अत्र कृष्णस्य मेघत्वारोपे वाचः अमृतत्वम् आरोपितम् इति साङ्गं रूपकम्।

**ग) निरङ्गम् – "निरङ्गं केवलस्यैव रूपणम्"** इति लक्षणम्। केवलस्य मुखस्य उपमानस्य यदि उपमेये अभेदारोपः भवति तदा तत् निरङ्गं रूपकम्। तच्च मालारूपं केवलरूपं चेति द्विविधम्। तस्य उदाहरणं यथा –

**"निर्माणकौशलं धातुश्चन्द्रिका लोकचक्षुषाम्।**

**क्रीडागृहमनङ्गस्य सेयमिन्दीवरेक्षणा।।"** इति। अत्र इन्दीवरेक्षणा उपमेया धातुः निर्माणकौशलम्, लोकचक्षुषां चन्द्रिका अनङ्गस्य क्रीडागृहम् इत्येतानि उपमानानि सन्ति। अत्र उपामानानां निरङ्गानां उपमेयायाम् इन्दीवरेक्षणायाम् अभेदारोपाद् निरङ्गरूपकालङ्कारः। एवं समासेन रूपकालङ्कारो वर्णित इति शम्।

## ४) उत्प्रेक्षा

विश्वनाथकविराजप्रणीतस्य साहित्यदर्पणस्य दशमपरिच्छेदे अलङ्कारवर्णनावसरे अलङ्कारस्य शब्दालङ्कारः अर्थालङ्कारश्चेति भेदद्वयम् उपन्यस्तम्। सादृश्यमूलकेषु अर्थालङ्कारेषु अन्यतमा उत्प्रेक्षा। तस्या लक्षणमुक्तं साहित्यदर्पणे – **"भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना।"** इति।

प्रकृतस्य उपमेयपदार्थस्य परात्मना उपमानपदार्थरूपेण सम्भावना संशयः भवति उत्प्रेक्षानामकः अलङ्कारः। अत्यन्तं सादृश्यवशात् उपमेयम् उपमानत्वेन आशङ्कते चेत् उत्प्रेक्षालङ्कारः। उपमेयोपमानयोः अत्यन्तं सादृश्यम् उत्प्रेक्षाघटकम् अस्ति। तथापि उपमेयोपमानयोः भेदज्ञानं तिरोहितं न भवति। भेदज्ञाने सत्यपि अभेदतया वर्णयितुम् अधिकतया कविः इच्छति। सम्भावनाशब्दस्य संशयः इति अर्थः भवति। तथापि शुद्धसंशयः न गृह्यते। स्थाणुर्वा पुरुषो वा इति ज्ञानं तु शुद्धसंशयात्मकं ज्ञानम्। अत्र स्थाणुरेव अयम् इति निश्चयात्मकं ज्ञानं तु सम्भावना भवति।

अत्र उत्प्रेक्षालङ्कारस्य उदाहरणम् –

**"ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।**

**गुणा गुणानुबन्धित्वात् तस्य सप्रसवा इव॥"** इति।

ज्ञाने सत्यपि मौनं तिष्ठति, शक्तौ सत्याम् अपि क्षमा विद्यते, त्यागे सत्यपि गर्वभावः नास्ति। रघुवंशस्य नृपे परस्परविरोधिनः गुणाः एकत्र सहावस्थानं करोति। परस्परविरुद्धगुणाः सहोदरवत् तिष्ठन्ति इति श्लोकतात्पर्यम्। अस्मिन् श्लोके ज्ञानादयो गुणाः उपमेया भवन्ति। सप्रसवाः इति उपमानम्। ज्ञानादिगुणाः सप्रसवरूपेण उत्प्रेक्षन्ते। इवशब्देन तच्च सादृश्यम् अधिकतया स्फुट्यते। अतः उत्प्रेक्षालङ्कारः विद्यते इति लक्षणसमन्वयः।

तस्याः उत्प्रेक्षायाः द्वात्रिंशद् भेदाः सन्ति। तथाहि उक्तं साहित्यदर्पणे –

**"वाच्या प्रतीयमाना सा प्रथमं द्विविधा मता।**

**वाच्येवादिप्रयोगे स्यादप्रयोगे परा पुनः।**

**जातिर्गुणः क्रिया द्रव्यं यदुत्प्रेक्ष्यं द्वयोरपि।।**

**तदष्टधापि प्रत्येकं भावाभावाभिमानतः।**

**गुणक्रियास्वरूपत्वान्निमित्तस्य पुनश्च ताः।।**

**द्वात्रिंशद्विधतां यान्ति ॥"** इति। एवं समासेन उत्प्रेक्षालङ्कारो वर्णित इति शम्।

## ५) अपह्नुतिः

विश्वनाथकविराजप्रणीतस्य साहित्यदर्पणस्य दशमपरिच्छेदे अलङ्कारवर्णनावसरे अलङ्कारस्य शब्दालङ्कारः अर्थालङ्कारश्चेति भेदद्वयम् उपन्यस्तम्। अर्थालङ्कारेषु अन्यतमा अपह्नुतिः। तस्या लक्षणमुक्तं साहित्यदर्पणे – **"प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपह्नुतिः।"** इति।

प्रकृतम् उपमेयं प्रतिषिध्य साक्षात् परोक्षेण वा निषिध्य अन्यस्य उपमानस्य स्थापनं प्रतिष्ठापनम् अपह्नुतिनामकः अलङ्कारः भवतीति लक्षणार्थः। अर्थाद् उपमेयस्य निषेधपूर्वकम् उपमेयस्य उपमानतादात्म्येन उपपादनम् अपह्नुतिः। अयम् अलङ्कारो द्विविधो भवति। क्वचिद् अपह्नवपूर्वक आरोपः क्वचिच्च आरोपपूर्वकः अपह्नवो भवति।

अत्र अपह्नुवपूर्वकस्य आरोपस्य उदाहरणं यथा –

**"नेदं नभोमण्डलमम्बुराशिर्नैताश्च तारा नवफेनभङ्गाः।**

**नायं शशी कुण्डलितः फणीन्द्रो नासौ कलङ्कः शयितो मुरारिः॥"** इति। इदं गगनं नास्ति, अम्बोः राशिः अस्ति। एतानि नक्षत्राणि न सन्ति, एते तु नवफेनसमूहाः। नायं चन्द्रः वर्तते, अपि तु कुण्डलितः फणिः। नायं चन्द्रस्य कलङ्कः, अपि तु शयितः विष्णुः इति श्लोकस्य सामान्यार्थः। अस्मिन् श्लोके नभोमण्डलम्, तारा, शशी, कलङ्कः च इति एते उपमेयाः सन्ति। अत्र अम्बुराशिः, नवफेनभङ्गः, कुण्डलितः फणीन्द्रः, मुरारिः इत्येतानि। अत्र श्लोके आकाशम्, शशी, कलङ्कः इति सर्वं सत्यम् अस्ति। किन्तु नञा प्रकृतं गगनादिकं निषिध्य अप्रकृतस्य सागरादिकस्य सत्यरूपेण स्थापना क्रियते। अत्र निषेधस्थापनयोः हेतुः सादृश्यम्। अतः प्रकृतस्य अपह्नवपूवकम् अप्रकृतस्य आरोपाद् अपह्नुवपूर्वकारोपरूपः अपह्नुत्यलङ्कारः।

आरोपपूर्वकस्य अपह्नवस्य उदाहरणं यथा –

**"विराजति व्योमवपुः पयोधिस्तारामयास्तत्र च फेनभङ्गाः।**

**फणीश्वरोऽयं द्विजराजमूर्त्तिर्नवाम्बुदश्रीर्ननु तस्य लक्ष्म॥"**इति। अत्र व्योम वपुः यस्य स व्योमवपुः इति। अत्र पयोधेः आकाशशरीरकल्पनात् तत्र च विद्यमानानां ताराणां फेनभङ्गत्वकल्पनात् उपमेयस्य व्योम्नः नक्षत्रस्य च निषेधो भवति। परन्तु निषेधवाचकं नञादिकं तु साक्षात् नास्ति। आदौ गगने नक्षत्रे च समुद्रस्य फेनसमूहस्य आरोपः क्रियते। स च निषेधः गगनादीनां निषेधं विना न कदापि सम्भवति। अत एव प्रकृते आदौ आरोपः ततः निषेधः अस्ति। अत्रापि तथा आरोपे सादृश्यम् एव कारणम्। अत एव आरोपपूर्वकापह्नवरूपः अपह्नुत्यलङ्कारः वर्णितः इति शम्।

## ६) अतिशयोक्तिः

विश्वनाथकविराजप्रणीतस्य साहित्यदर्पणस्य दशमपरिच्छेदे अलङ्कारवर्णनावसरे अलङ्कारस्य शब्दालङ्कारः अर्थालङ्कारश्चेति भेदद्वयम् उपन्यस्तम्। अर्थालङ्कारेषु अन्यतमा अतिशयोक्तिः। तस्या लक्षणमुक्तं साहित्यदर्पणे – **"सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते"** इति।

अध्यवसायस्य सत्ये वस्तुनि असत्यात्मना सम्भावनायाः सिद्धत्वे निश्चयतया सम्पत्तौ अतिशयोक्तिनामकः अलङ्कारो भवतीति लक्षणस्यार्थः। अर्थाद् विषयेण साकं विषयिणः अभेदप्रतीतेः निश्चयात्मके सति अतिशयोक्त्यलङ्कारः। अध्यवसायः नाम अयथार्थवस्तुना यथार्थवस्तुनः निगरणम्। अर्थात् उपमेयस्य निगरणपुरःसरम् उपमानेन सह तस्य अभेदज्ञानम् अध्यवसायः। विश्वनाथः कथयति – "विषयनिगरणेनाभेदप्रतिपत्तिर्विषयिणोऽध्यवसायः॥" इति। उत्प्रेक्षालङ्कारे सम्भावनाया अनिश्चितरूपतया साध्यत्वम्। अतिशयोक्तौ कविप्रौढोक्तिवशात् सम्भावना निश्चितरूपा इति सिद्धत्वम्।

अयम् अतिशयोक्त्यलङ्कारः पञ्चविधः – क) भेदे अपि अभेदः, ख) अभेदे भेदः, ग) सम्बन्धे असम्बन्धः, घ) असम्बन्धे सम्बन्धः ङ) कार्यकारणयोः पौर्वापर्यात्ययश्च।

**क) भेदे अपि अभेदः –** भेदे अभेदरूपाया अतिशयोक्तेः उदाहरणं तावत् –

**"कथमुपरि कलापिनः कलापो विलसति तस्य तलेऽष्टमीन्दुखण्डम्।**

**कुवलययुगलं ततो विलोलं तिलकुसुमं तदधः प्रवालमस्मात्॥"**इति। नायिकायाः मस्तके मयूरपुच्छम्, तस्याधः अष्टमीन्दुखण्डः, तस्याधः चञ्चलं नीलोत्पलयुगलम्, तस्याधः तिलकुसुमम्, तस्य एकं प्रवालम् कथम्। श्लोके कथम् इति पदं सम्भावनासूचकम् अस्ति। अत्र नायिकाकेशकलापभालस्थलनेत्रयुगलनासिकाधरोष्ठानाम् उपमेयानां कलापिकलापादिभिः उपमानैः सह अभेदज्ञानात् अध्यवसायस्य सिद्धत्वम् इति अतिशयोक्तेः उदाहरणम्। अत्र केशादिकम् उपमेयं कलापादिकम् उपमानञ्च परस्परं भिन्नम्। तथापि उपमानोपमेययोः अभेदप्रतीतिः भवति।

**ख) अभेदे भेदः –** अभेदे भेदरूपाया अतिशयोक्तेः उदाहरणं तावत् –

**"अन्यदेवाङ्गलावण्यमन्याः सौरभसम्पदः।**

**तस्याः पद्मपलाशाक्ष्याः सरसत्वमलौकिकम्॥"**इति। नायिकायाः पद्मपलाशाक्ष्याः अङ्गलावण्यं साधारणलावण्यतो भिन्नमेव, अङ्गानां सौरभसम्पत्तयः साधारणविलक्षणाः, तस्याः सानुरागत्वं लौकिकाद् भिन्नं लोकातिक्रान्तमेव

इति श्लोकतात्पर्यम्। अत्र अन्यनायिकासु यादृशं लावण्यादिकं तादृशमेव नायिकायाम् इति अभेदे सत्यपि असाधारणलावण्याद्यात्मना भेदस्य अध्यवसायो भवति। अतः अभेदे सत्यपि भेदप्रतीतेः अभेदे भेदरूपा अतिशयोक्तिः भवति।

**ग) सम्बन्धे असम्बन्धः –** सम्बन्धे असम्बन्धरूपाया अतिशयोक्तेः उदाहरणं तावत् –

**"अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः**

**शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः।**

**वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो**

**निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः॥"** इति। सुन्दर्याः उर्वश्याः सृष्टिकार्ये कान्तिप्रदः चन्द्रः अथवा मदनः वसन्तमासो वा सृष्टिकर्ता अभूत्? वेदाभ्यासजडः विषयव्यावृत्तकौतूहलः ब्रह्मा नहि इदं मनोहरं रूपं निर्मातुं शक्नुयाद् इति श्लोकतात्पर्यम्। वस्तुतः सर्वस्य सृष्टिकर्ता ब्रह्मा एव। अतः उर्वश्याः प्रजापतिकर्तृकनिर्माणसम्बन्धे सत्यपि वेदाभ्यासजडत्वादिना तादृशमनोहरसर्जनं न सम्भवतीति असम्बन्धः दर्शनाद् अतिशयोक्त्यलङ्कारः।

**घ) असम्बन्धे सम्बन्धः –** असम्बन्धे सम्बन्धरूपाया अतिशयोक्तेः उदाहरणं तावत् –

**"यदि स्यान्मण्डले सक्तमिन्दोरिन्दीवरद्वयम्।**

**तदोपमीयते तस्या वदनं चारुलोचनम्॥"** इति। यदि चन्द्रमण्डले नीलकमलयुगलं संश्लिष्टं स्यात् तदा चारुनयनोपेतं तस्या नायिकाया वदनम् उपमातुं शक्यम् इति श्लोकतात्पर्यम्। अत्र यद्यर्थबलाद् असम्बन्धः सूचितः। ततः असम्बन्धे सम्बन्धस्य अध्यवसायाद् अतिशयोक्तिः।

**ङ) कार्यकारणयोः पौर्वापर्यात्ययः–** कार्यकारणयोः पौर्वापर्यात्ययः नाम पौर्वपर्यस्य विनाशः। आदौ कारणं ततः कार्यम् इति पौर्वापर्यम्। तस्य विनाश एव पौर्वापर्यात्ययः। कार्यकारणयोः पौर्वापर्यात्ययरूपाया अतिशयोक्तेः उदाहरणं तावत् –

**"प्रागेव हरिणाक्षीणां चित्तमुत्कलिताकुलम्।**

**पश्चादुद्भिन्नबकुलरसालमुकुलप्रियः॥"** इति। हरिणाक्षीणां चित्तम् आदौ सुरतेच्छया आकुलं संवृत्तं ततः परमेव विकसितानां बकुलाम्रमुकुलानां शोभाः सम्पन्ना इति श्लोकतात्पर्यम्। वस्तुतस्तु बकुलाम्रयोः विकसितमुकुलदर्शनमेव कामिनीनां हृदये सङ्गमेच्छायाः कारणम्। एवं कार्यकारणयोः पौर्वापर्यस्य विनाशात् कविप्रौढोक्तिवशाद् कारणात् कार्यस्य पूर्वभावित्वेन अध्यवसायात् कार्यकारणयोः पौर्वापर्यात्ययरूपा अतिशयोक्तिः।

एवमेव अतिशयोक्त्यलङ्कारस्य बहवः प्रकाराः सम्भवन्ति इति अलं विस्तरेणेति शम्।

## ७) प्रतिवस्तूपमा

विश्वनाथकविराजप्रणीतस्य साहित्यदर्पणस्य दशमपरिच्छेदे अलङ्कारवर्णनावसरे अलङ्कारस्य शब्दालङ्कारः अर्थालङ्कारश्चेति भेदद्वयम् उपन्यस्तम्। अर्थालङ्कारेषु अन्यतमा प्रतिवस्तूपमा। तस्या लक्षणमुक्तं साहित्यदर्पणे –

**"प्रतिवस्तूपमा सा स्याद् वाक्ययोर्गम्यसाम्ययोः।**

**एकोऽपि धर्मः सामान्यो यत्र निर्दिश्यते पृथक्॥"** इति।

वाक्ययोः गम्यसाम्ययोः एकोऽपि अपृथग्भूतोऽपि सामान्यः उपमानोपमेयगतसाधारणः धर्मः गुणक्रियान्यतररूपः पृथग् भिन्नतया निर्दिश्यते प्रतिबोध्यते सा प्रतिवस्तूपमा भवति। अत्र एकं वाक्यं उपमानगतम् अपरं च वाक्यम् उपमेयगतम्। तयोः वाक्ययोः साम्यं सादृश्यं गम्यं प्रतीयमानं न हि वाच्यमस्ति।

प्रतिवस्तूपमाया उदाहरणं तावत् –

**"धन्यासि वैदर्भि गुणैरुदारैर्यया समाकृष्यत नैषधोऽपि।**

**इतः स्तुतिः का खलु चन्द्रिकाया यदब्धिमप्युत्तरलीकरोति॥"** इति। नैषधीयचरिते दमयन्तीं प्रति हंसस्य इयमुक्तिः। त्वं दमयन्ति प्रशंसनीया भवसि, त्वया महनीयैः गुणैः निषाधाधिपतिः नलः समाकृष्टः। चन्द्रस्य एतदपेक्षया का स्तुतिर्भवति यत् स समुद्रमपि उत्तरलीकरोति इति श्लोकस्य सामान्यार्थः। अत्र प्रथमं वाक्यम् उपमेयगतं द्वितीयञ्च उपमानगतम्। अत्र दमयन्तीचन्द्रिकयोः नैषधसमुद्रयोश्च उपमेयोपमानयोः साम्यं न वाच्यम् अपि तु प्रतीयमानम्। प्रथमांशे समाकृष्यत इति पदवाच्यं समाकर्षणं द्वितीयांशे उत्तरलीकरोति इति पदवाच्यम् उत्तरलीकरणं च एका एव क्रिया पौनरुक्त्यनिरासाय भिन्नवाचकताय निर्दिष्टा। अतः अत्र प्रतिवस्तूपमालङ्कारः। इयं प्रतिवस्तूपमा क्वचित् मालारूपा क्वचिच्च वैधर्म्येण भवति। एवं समासेन प्रतिवस्तूपमा वर्णिता इति शम्।

## ८) अर्थान्तरन्यासः

विश्वनाथकविराजप्रणीतस्य साहित्यदर्पणस्य दशमपरिच्छेदे अलङ्कारवर्णनावसरे अलङ्कारस्य शब्दालङ्कारः अर्थालङ्कारश्चेति भेदद्वयम् उपन्यस्तम्। अर्थालङ्कारेषु अन्यतमः अर्थान्तरन्यासः। तस्य लक्षणमुक्तं साहित्यदर्पणे –

**"सामान्यं वा विशेषेण विशेषस्तेन वा यदि।**

**कार्यं च कारणेनेदं कार्येण च समर्थ्यते॥**

**साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः।"** इति। अर्थाद् यदि विशेषेण सामान्यं समर्थ्यते, तद्वदेव तेन सामान्येन वा विशेषः समर्थ्यते, तद्वदेव कारणेन च कार्यं समर्थ्यते, तद्वदेव कार्येण कारणं वा समर्थ्यते – एतेषां चतुर्विधानां साधर्म्येण वैधर्म्येण च पुनर्द्वैविध्येन अष्टप्रकारः अर्थान्तरन्यासो भवति। एवं हि प्रतिपादितार्थसमर्थनम् अर्थान्तरन्यासः।

तत्र विशेषेण सामान्यसमर्थनस्य उदाहरणं यथा –

**"बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति।**

**सम्भूयाम्भोधिमभ्येति महानद्या नगापगा॥"** इति। अतिशयक्षुद्रोऽपि जनः महत्सहायः कार्यस्य पारं गच्छतीति प्रथमार्धगतस्य सामान्यस्य पर्वतनदी गङ्गादिमहानद्या सह सम्मिल्य सागरम् अभ्युपगच्छतीति द्वितीयार्धगतेन विशेषेण समर्थनाद् अर्थान्तरन्यासालङ्कारः।

तत्र सामान्येन विशेषसमर्थनस्य उदाहरणं यथा –

**"यावदर्थपदां वाचमेवमादाय माधवः।**

**विरराम महीयांसः प्रकृत्या मितभाषिणः॥"** इति। अर्थपरिमितानि पदानि यस्यां तादृशीं वाचम् उक्त्वा माधवः विरतवान् इति प्रथमार्धगतस्य विशेषस्य महीयांसः प्रकृत्या मितभाषिण इति द्वितीयार्धगतेन सामान्येन समर्थनाद् अर्थान्तरन्यासालङ्कारः।

तत्र कारणेन कार्यसमर्थनस्य उदाहरणं यथा –

**"पृथ्वि स्थिरा भव भुजङ्गम धारयैनां**

**त्वं कूर्मराज तदिदं द्वितयं दधीथाः।**

**दिक्कुञ्जराः कुरुत तत्त्रितये दधीर्षाम्**

**आर्यः करोति हरकार्मुकमाततज्यम्॥"** इति। अत्र कारणेन हरकार्मुकाततज्यीकरणेन पृथिव्यादीनां स्थैर्यादीनां कार्याणां समर्थनाद् अर्थान्तरन्यासालङ्कारः।

तत्र कार्येण कारणसमर्थनस्य उदाहरणं यथा –

**"सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।**

**वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः॥"** इति। अत्र कार्येण सम्पद्वरणेन सहसा कार्यं न कर्तव्यम् इति विमृश्यकारित्वरूपस्य कारणस्य समर्थनाद् अर्थान्तरन्यासालङ्कारः।

साधर्म्येण अर्थान्तरन्यासस्य एतानि चत्वारि उदाहरणानि भवन्ति। एवमेव वैधर्म्येण चत्वारः भेदाः सिध्यन्तीति समासेन अर्थान्तरन्यासालङ्कारो वर्णित इति शिवम्।